## कक्षा दशमी
## अध्ययनाय सामग्री

**1 अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

प्रतिवर्षम् अगस्तमासस्य पञ्चदशतिथौ सम्पूर्णे भारतवर्षे स्वातन्त्र्यदिवसोत्सवः मान्यते। अस्मिन् दिने अस्माकं राष्ट्रं परकीयाणां बन्धनात् विमुक्तम् अभवत्। 1947 तमे वर्षे अस्मिन् दिने ब्रिटिशशासकैः सुबद्धा भारतमाता परतन्त्रातायाः शृङ्खलां परित्यज्य बन्धनविहीना जाता। तदा दिल्लीनगरे रक्तदुर्गे (लालकिला) प्रधानमन्त्रिमहोदयैः राष्ट्रीयध्वजारोहणं सञ्जातम्। तस्मादेव दिनादारभ्य महोत्सवोऽयं प्रतिनगरं प्रतिग्रामं च भारतवासिभिः महता समारोहेण मान्यते। स्वतन्त्रातादिवसे प्रातःकाले एव नगरे-नगरे ग्रामे-ग्रामे च राष्ट्रीयध्वजारोहणं क्रियते। तदनन्तरं नेतृणां भाषणानि भवन्ति।

**I. एकपदेन उत्तरत-**

(क) दिल्लीनगरे कुत्र राष्ट्रीयध्वजारोहणं सञ्जातम्?

(ख) अगस्तमासस्य पञ्चदशतिथौ अस्माकं राष्ट्रं केषां बन्धनात् विमुक्तमभवत्?

(ग) कस्मिन् मासे सम्पूर्णे भारतवर्षे स्वातन्त्र्यदिवसोत्सवः मान्यते?

(घ) रक्तदुर्गं कुत्र वर्तते?

**II. पूर्णवाक्येन उत्तरत-**

(क) कदा कुत्र च स्वातन्त्र्यदिवसोत्सवः मान्यते?

(ख) स्वतन्त्रातादिवसे प्रातःकाले ¯क क्रियते?

**III. गद्यांशस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

**IV. भाषिककार्यम्-**

(क) 'मान्यते' इत्यस्य क्रियापदस्य कर्तृपदं किम्?

(क) भारतवर्षः (ख) स्वातन्त्र्यदिवसोत्सवः (ग) राष्ट्रम् (घ) अस्माकम्

(ख) 'सञ्जातम्' अस्य पदस्य कः पर्यायः अत्र प्रयुक्तः?

(क) अभवत् (ख) क्रियते (ग) भवति (घ) कुर्वन्ति

(ग) 'त्यक्त्वा' अस्य पदस्य कृते गद्यांशे ¯क पदम् प्रयुक्तम्?

(क) परित्यज्य (ख) प्रतिवर्षम् (ग) बन्धहीनः (घ) कार्यक्रमः

(घ) 'महोत्सवोऽयम्' इदं पदं कस्मै प्रयुक्तम्?

(क) भारताय (ख) स्वतन्त्रातादिवसोत्सवाय (ग) वैदेशिकाय (घ) रक्तदुर्गाय

**2. अधोलिखितान् गद्यांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

अन्यस्य जनस्य हिताय यत् कार्यं चिन्तनं वा क्रियते तदेव परोपकारः भवति। मनुष्यस्य मध्ये प्रवृत्तिद्वयं दृश्यते- एका स्वार्थस्य अपरा च परोपकारस्य। केचन जनाः तादृशाः अपि सन्ति, ये न स्वार्थं समीहन्ते न च परोपकारं कुर्वन्ति। ते जनाः अतीव अधन्याः समाजाय च अभिशापरूपाः एव। यस्य केवला स्वार्थबुद्धिः, सः राक्षसः इव सततम् आचरति। ततः वरतराः ते जनाः, ये यद्यपि सर्वात्मना आत्मं भरयः, परं ते परमुखापेक्षिणः न तिष्ठन्ति। यः खलु स्वार्थं सेवमानः परमार्थम् अपि चिन्तयति करोति च यशाशक्ति, सः एव पुरुषः प्रशस्यः।

I. **एकपदेन उत्तरत-**

(क) मनुष्यस्य मध्ये कः दृश्यते?

(ख) मनुष्यस्य मध्ये कति प्रवृत्ती?

(ग) ये केवलं स्वार्थं समीहन्ते परोपकारं च न कुर्वन्ति, ते जनाः के भवन्ति?

(घ) अन्यस्य जनस्य हिताय चिन्तनं किं भवति?

II. **पूर्णवाक्येन उत्तरत-**

(क) यस्य केवला स्वार्थबुद्धिः भवति, सः कः इव आचरति?

(ख) कीदृशाः जनाः अधन्याः अभिशापरूपाः च सन्ति?

III. **अस्य गद्यांशस्य उचितं शीर्षकं लिखत।**

IV. **भाषिककार्यम्-**

(1) 'पुरुषः प्रशस्यः' इत्यनयोः पदयोः कः विशेष्यः?

(क) पुरुषः (ख) प्रशस्यः (ग) पुरुष (घ) प्रशस्य

(2) 'परमार्थबुद्धिः' इत्यस्य पदस्य कः विपर्ययः गद्यांशे आगतः?

(क) क्षुधाम् (ख) तृप्तम् (ग) यशसे (घ) स्वार्थबुद्धिः

(3) 'निरन्तरम्' इति पदस्य कृते गद्यांशे किं पदं प्रयुक्तम्?

(क) विराजते (ख) सततम् (ग) तादृशम् (घ) आत्मानम्

(4) 'आचरति' इति क्रियापदस्य अनुच्छेदे किं कर्तृपदम् आगतम्?

(क) राक्षस (ख) सततम् (ग) सः (घ) स्वार्थबुद्धिः

**3. भवान् देवव्रत शर्मा स्वगृहस्य समीपं जलसंरक्षणं कर्तुम् इच्छति। एतदर्थं भवान् नगरनिगमस्य आयुक्तं सहायतायै पत्रां लिखति। मञ्जूषायाः**

**समुचितानि पदानि नीत्वा स्वपत्रां पूरयतु भवान्-**

.........................

पञ्जाब-प्रान्तम्

दिनाङ्कः .........................

सेवायाम्,

श्रीमन् आयुक्तमहोदय!

.........................

मोहालीनगरम्

विषयः- जलसंरक्षणार्थं शासनस्य सहायता-याचनम्

महोदय,

अहं ......................... सप्तमे खण्डे (सैक्टर) निवसामि। इदानीम् अस्य क्षेत्रस्य जनाः ......................... अनुभवं कुर्वन्ति। भविष्ये अस्याः समस्यायाः ......................... कर्तुम् अहं स्वगृहे जलस्य ......................... कर्तुम् इच्छामि अतः शासनस्य ......................... इच्छामि। भवान् नगरनिगमात्

साधनरूपे तकनीकरूपे च यां सहायतां कर्तुं ......................... अस्ति, कृपया शीघ्रमेव लिखतु। अहं भवताम् ......................... भविष्यामि।

भवतां पत्रोत्तरं प्रतीक्ष्यमाणः।

भवदीयः

.........................

गृहसंख्या 16, खण्डः-7

मोहालीनगरम्

**मञ्जूषा**

| |
|---|
| आभारी, संरक्षणम्, मोहालीनगरम्, समर्थः, देवव्रतः, अत्र, सहायताम्, नगरनिगमः, समाधानम्, जलाभावस्य |

**4. भीष्मः चक्रवर्ती भवान् इण्टरनेट बैंकिंग-माध्यमेन स्वभ्रातरं प्रति दशसहस्रं रूप्यकाणि प्रेषयितुम् इच्छति अतः धनादेशं दातुं स्वक्षेत्रस्य डाकपालम् इदं पत्रं लिखति।**

**मञ्जूषायाः सहायतया इदं पत्रं पूरयतु भवान्-**

विनयनगरम्

.........................

दिनाङ्कः .........................

सेवायाम्,

श्रीमन्तः .........................

विनयनगरम् डाकगृहम् (दिल्लीराज्यम्)

विषयः- इण्टरनेट-बैंकिंग-माध्यमेन धनादेशं प्रेषणाय

महोदय,

अहम्

भवतां डाकगृहमाध्यमेन ......................... राज्यस्य निवासिनं स्वभ्रातरं प्रति इण्टरनेट-बैंकिंग- द्वारा ......................... रूप्यकाणि प्रेषयितुम् इच्छामि। कृपया कथयतु भवान् यत् इयं ......................... कथं भविष्यति कति च रूप्यकाणि ......................... रूपे प्रदास्यन्ते कदा च ......................... तस्मै प्रदास्यति अहं तस्मै शीघ्रं ......................... प्रेषयितुम् इच्छामि। कृपया शीघ्रमेव उत्तरं यच्छतु भवान्। अहं भवताम् ......................... भविष्यामि।

निवेदकः

.........................

**मञ्जूषा**

| |
|---|
| रूप्यकाणि, प्रक्रिया, भीष्मः चक्रवर्ती, दिल्लीराज्यम्, धनम्,<br>डाकपालमहोदयाः, आभारी, बिहार, शुल्कस्य, दशसहस्रम्। |

**5. मञ्जूषायां प्रदत्तशब्दानां सहायतया 'वर्षर्तौ उद्यानस्य वर्णनम्' इति विषये संस्कृते पञ्च वाक्यानि लिखत-**

**मञ्जूषा**

| |
|---|
| सर्वत्र हरीतिमा, वृक्षाः, स्नाताः इव, पतन्ति, पक्वानि फलानि, सर्वत्र जलम् एव, वर्षर्तौ, उद्यानम्, गर्तेषु बालकाः, कर्गदनौकाः, पुष्पाणि, स्वच्छानि, यदा-कदा सूर्यः, पुष्पाणां सौन्दर्यम् । |

**6. अधः प्रदत्तशब्दानां सहायतया 'दीपावल्याः वर्णनम्' इति विषये संस्कृते पञ्च वाक्यानि लिखत-**

**मञ्जूषा**

| |
|---|
| दीपानाम् अवलिः, रात्रौ, अमावस्या, अन्धकारः, श्रीरामः, अयोध्याम्, प्रजाः, प्रसन्नाः, आगतः, निशायाः, दूरीकृतः, मिष्ठान्नानि, दीपान्, ज्वालयामः, सर्वत्रा उल्लासः, हर्षः । |

**7. चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृतेन पञ्चवाक्यानि लिखत ।**



**मञ्जूषा**

| |
|---|
| अग्रजस्य, अनजुस्य, भगिनी, स्वक्रमस्य, रक्षाबन्धनम्, रक्षासूत्रम्, करोति, करिष्यति, मणिबन्धे, मिष्टान्नम्, अन्यम्, पश्चात्, पश्यति, प्रसन्नः, मातापितरौ, दृष्ट्वा , प्रसन्नौ, पर्वणः, बन्धति। |

**8. चित्रं दृष्ट्वा मञ्जूषायाः सहायतया संस्कृतेन पञ्चवाक्यानि लिखत ।**

**मञ्जूषा**


| |
|---|
| अग्रजस्य, अनजुस्य, भगिनी, स्वक्रमस्य, रक्षाबन्धनम्, रक्षासूत्रम्, करोति, करिष्यति, मणिबन्धे, मिष्टान्नम्, अन्यम्, पश्चात्, पश्यति, प्रसन्नः, मातापितरौ, दृष्ट्वा , प्रसन्नौ, पर्वणः, बन्धति। |



9. अव्ययानि -

- उच्चैः= जोर से		च = और		श्वः= आने वाला कल
- ह्यः= बीता हुआ कल		अद्य= आज		अत्र-तत्र= यहाँ- वहाँ
- यत्र= जहाँ		कुत्र= कहाँ		इतस्ततः= इधर-उधर
- इदानीम् (अधुना, सम्प्रति, साम्प्रतम्) = अब		यदा= जब
- तदा=तब		कदा= कब		सहसा=अचानक
- वृथा=बेकार		शनैः= धीरे		अपि=भी
- कुतः= कहाँ से		यदि-तर्हि= यदि – तो
- यावत्-तावत् = जब तक / जितना – तब तक / उतना

10. समयः

**पूर्णसमयः**

| | | | |
|---|---|---|---|
| 1:00 | एकवादनम् | 2:00 | द्विवादनम् |
| 3:00 | त्रिवादनम् | 4:00 | चतुर्वादनम् |
| 5:00 | पञ्चवादनम् | 6:00 | षड्वादनम् |
| 7:00 | सप्तवादनम् | 8:00 | अष्टवादनम् |
| 9:00 | नववादनम् | 10:00 | दशवादनम् |
| 11:00 | एकादशवादनम् | 12:00 | द्वादशवादनम् |

**सपाद** (0:15)

| | | | |
|---|---|---|---|
| 1:15 | सपाद - एकवादनम् | 2:15 | सपाद - द्विवादनम् |
| 3:15 | सपाद - त्रिवादनम् | 4:15 | सपाद - चतुर्वादनम् |
| 5:15 | सपाद - पञ्चवादनम् | 6:15 | सपाद - षड्वादनम् |

| | | |
|---|---|---|
| | 7:15 सपाद - सप्तवादनम् | 8:15 सपाद - अष्टवादनम् |
| | 9:15 सपाद - नववादनम् | 10:15 सपाद - दशवादनम् |
| | 11:15 सपाद - एकादशवादनम् | 12:15 सपाद-द्वादशवादनम् |
| **सार्ध (0:30)** | 1:30 सार्ध - एकवादनम् | 2:30 सार्ध - द्विवादनम् |
| | 3:30 सार्ध - त्रिवादनम् | 4:30 सार्ध - चतुर्वादनम् |
| | 5:30 सार्ध - पञ्चवादनम् | 6:30 सार्ध - षड्वादनम् |
| | 7:30 सार्ध - सप्तवादनम् | 8:30 सार्ध - अष्टवादनम् |
| | 9:30 सार्ध - नववादनम् | 10:30 सार्ध - दशवादनम् |
| | 11:30 सार्ध - एकादशवादनम् | 12:30 सार्ध- द्वादशवादनम् |
| **पादोन (0:45)** | | |
| | 12:45 पादोन - एकवादनम् | 1:45 पादोन - द्विवादनम् |
| | 2:45 पादोन - त्रिवादनम् | 3:45 पादोन - चतुर्वादनम् |
| | 4:45 पादोन - पञ्चवादनम् | 5:45 पादोन - षड्वादनम् |
| | 6:45 पादोन - सप्तवादनम् | 7:45 पादोन - अष्टवादनम् |
| | 8:45 पादोन - नववादनम् | 9:45 पादोन - दशवादनम् |
| | 10:45 पादोन - एकादशवादनम् | 11:45 पादोन -द्वादशवादनम् |

**11. सप्तककाराः**

| | |
|---|---|
| किम् = क्या? | कुत्र = कहाँ? |
| कति = कितना / कितने? | कदा= कब? |
| कुतः = कहाँ से? | कथम् = कैसे? |
| किमर्थम् = किस लिए? | |

**निर्देशाः –** 1. नवमकक्षायाः शब्दरूपाणि धातुरूपाणि सम्यक्तया स्मरन्तु । लिखित्वा अभ्यासं कुर्वन्तु । (No need to do in fair copy). अनुवाद-अशुद्धि-संशोधन-वाच्य-चित्रवर्णनसदृशेभ्यः व्याकरण-अंशेभ्यः शब्दरूपाणां धातुरूपाणां च महती आवश्यकता भवति।

2. एतत् सर्वं कार्यं कक्षा-पुस्तिकायां (In green cover-copy) कुर्वन्तु ।

3. स्मरणार्थम् अंशाः – शब्दरूपाणि, धातुरूपाणि, उपपदविभक्तयः, सप्तककाराः, प्रथम-मध्यम-उत्तमपुरुषाः, कारक-चिह्नानि (नवमी-कक्षायाः आधारेण) , समयः, अव्ययानि (दशमी-आधारेण)।